पादपरं न किञ्चिदिति” शब्दार्थचिन्तामणिष्टतेषु महाविष्ण्वादिषु च पु० १३गुग्गुलौ राजनि० १४दुर्गममात्रे त्रि० १५दुर्ज्ञेये १६परमेश्वरे पु० “दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा” विष्णु सं०। “अन्तरायप्रतिहतैर्दुराप्यते इति दुर्गः” भा०

**दुर्गकर्म्मन्** न०दुर्गार्थं दुर्गे वा कर्म कार्यम्। भा०शा०८६अ० उक्ते दुर्गसाधनकर्मभेदे यथा

“तस्मात्ते वर्तयिष्यामि दुर्गकर्म विशेषतः। श्रुत्वा तथा विधातव्यमनुष्ठेयञ्च यत्नतः। षड्विधं दुर्गमास्थाय पुराण्यथ निवेशयेत्। सर्वसम्पत्प्रधानं यद्बाहुल्यञ्चापि सम्भवेत्। धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च। मनुष्यदुर्गं मृद्दुर्गं वनदुर्गञ्च तानि षट्। यत् पुरं दुर्गसम्पन्नं धान्यायुधसमन्वितम्। दृढप्राकारपरिखं हस्त्यश्वरथसङ्कुलम्। विद्वांसः शिल्पिनो यत्र निचयाश्च सुचिन्तिताः। धार्मिकश्च जनो यत्र दाक्ष्यमुत्तममास्थितः। ऊर्जस्विनरनागाश्वं चत्वरापणशोभितम्। प्रसिद्धव्यवहारञ्च प्रशान्तमकुतोभयम्। सुप्रभं शान्तनादञ्च सुप्रशस्तनिवेशनम्। शूराढ्यजनसम्पन्नं ब्रह्मघोषानुनादितम्। समाजोत्सवसम्पन्नं सदा पूजितदैवतम्। वश्यामात्यबलो राजा तत् पुरं स्वयमाविशेत्। तत्र कोषं बलं मित्रं व्यवहारञ्च वर्द्धयेत्। पुरे जनपदे चैव सर्वदोषान्निवर्त्तयेत्। भाण्डागारायुधागारं प्रयत्नेनाभिवर्द्धयेत्। निचयान् वर्द्धयेत् सर्वांस्तथा यन्त्रायुधालयान्। काष्ठलोहतुषाङ्गारदारुशृङ्गास्थिवैणवान्। मज्जास्नेहवसाक्षौद्रमौषधग्राममेव च। शणं सर्जरसन्धान्यमायुधानि शरांस्तथा। चर्मस्नायुं तथा वेत्रं मुञ्जवल्वजबन्धनान्। आशयाश्चोदपानाश्च प्रभूता सलिलाकराः। निरोद्धव्याः सदा राज्ञा क्षीरिणश्च महीरुहाः। सत्कृताश्च प्रयत्नेन आचार्यर्त्विक्पुरोहिताः। महेष्वासाः स्थपतयः सांवत्सरचिकित्सकाः। प्राज्ञा मेधाविनो दान्ता दक्षाः शूरा बहुश्रुताः। कुलीनाः सत्त्वसम्पन्ना युक्ताः सर्वेषु कर्मसु। पूजयेद्धार्मिकान् राजा निगृह्णीयादधार्मिकान्। नियुञ्ज्याच्च प्रयत्नेन सर्ववर्णान् स्वकर्मसु। बाह्यमाभ्यन्तरञ्चैव पौरजानपदं तथा। चारैः सुविदितं कृत्वा ततः कर्म प्रयोजयेत्। चरान् मन्त्रञ्च कोषञ्च दण्डञ्चैव विशेषतः। अनुतिष्ठेत् स्वयं राजा सर्वं ह्यत्र प्रतिष्ठितम्। उदासीनारिमित्राणां सर्वमेव चिकीर्षितम्। पुरे जनपदे चैव ज्ञातव्यं चारचक्षुषा। ततस्तेषां विधातव्यं सर्वमेवाप्रमादतः। भक्तान् पूजयता नित्यं द्विषतश्च निगृह्णता। यष्टव्यं क्रतुभिर्नित्यं दातव्यञ्चाप्यपीडया। प्रजानां रक्षणं कार्यं न कार्यं धर्मबाधकम्। कृपणानाथवृद्धानां विधवानाञ्च योषिताम्। योगक्षेमञ्च वृत्तिञ्च नित्यमेव प्रकल्पयेत्। आश्रमेषु यथाकालं चेलभाजनभोजनम्। सदैवोपहरेद्राजा सत्कृत्याभ्यर्च्य मान्य च। आत्मानं सर्वकार्याणि तापसे राष्ट्रमेव च। निवेदयेत् प्रयत्नेन तिष्ठेत् प्रह्वश्च सर्वदा। सर्वार्थत्यागिनं राजा कुले जातं बहुश्रुतम्। पूजयेत्तादृशं दृष्ट्वा शयनासनभोजनैः। तस्मिन् कुर्वीत विश्वासं राजा कस्याञ्चिदापदि। तापसेषु हि विश्वासमपि कुर्वन्ति दस्यवः। तस्मिन् निधीनादधीत प्रज्ञां पर्याददीत च। न चापि तीक्ष्णं सेवेत भृशं वा प्रतिपूजयेत्। अन्यः कार्यः स्वराष्ट्रेषु परराष्ट्रेषु चापरः। अटवीषु परः कार्यः सामन्तनगरेष्वपि। तेषु सत्कारमानाभ्यां संविभागांश्च कारयेत्। परराष्ट्राटवीस्थेषु यथा स्वविषये तथा। ते कस्याञ्चिदवस्थायां शरणं शरणार्थिने। राज्ञे दद्युर्यथाकामं तापसाः संशितव्रताः। एष ते लक्षणोद्देशः सङ्क्षेपेण प्रकीर्त्तितः। यादृशे नगरे राजा स्वयमावस्तुमर्हति”।

**दुर्गकारक** पु० दुर्गं करोति वेष्टनेन कृ–ण्वुल्। १वृक्षभेदे। २दुर्गकर्त्तरि त्रि०।

**दुर्गत** त्रि० दुर्गच्छति दुर्+गम–कर्त्तरि क्त। १दरिद्रे २दैन्ययुक्ते च अमरः। “समाश्वसिमि केनाहं कथं प्राणिमि दुर्गतः” भट्टिः। “निधानकुम्भस्य यथैव दुर्गतः” सा०द०।

**दुर्गतरणी** स्त्री दुर्गं तीर्य्यतेऽनया तॄ–करणे ल्युट् ङित० ङीप्। देवीभेदे “सावित्री दुर्गतरणी वीणा सप्तविधा तथा” भा०स०११अ०ब्रह्मसभावर्णने। २दुर्गतरणसाधने त्रि०

**दुर्गति** स्त्री दुष्टा गतिः प्रा०स०। १नरके अमरः। २दारिद्र्ये मेदि०। “न दुर्गतिमवाप्नोति स्वर्गलोकञ्च गच्छति” भा०शा० ५५८३श्लो० दुःस्थिता गतिरस्य प्रा०ब०। ३तद्युते त्रि०।

**दुर्गतिनाशिनी** स्त्री दुर्गतिं नाशयति नाशि–णिनि ङित० ङीप्। दुर्गादेव्याम्। “ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः। ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी” ब्रह्मवै०गणे०ख०। २दुर्गतिनाशके त्रि०स्त्रियां ङीप्।

**दुर्गन्ध** पु० दुःस्थितो गन्धोऽस्य प्रा०ब०। १सौवर्चललवणे हेम०। २दुष्टगन्धयुक्ते त्रि०। प्रा०स०। ३दुष्टे गन्धे “मांस-